# विश्ववाणी

विकृति–भाद्रपद–शुक्ल–चतुर्थी सेप्टेम्बर् ११, २०१०

## गृहस्वामी उत अतिथिः ?

चिन्तयतु उदात्तचित्तः भवान् कदाचित् भवतः सर्वाणि मित्राणि कानिचन दिनानि स्वगृहे वासं कर्तुम् आह्वयति । सर्वे आगत्य ससन्तोषं भवतः आतिथ्यं स्वीकुर्वन्ति च । काले एकः धूर्तः अतिथिः तु सर्वेषां खाद्यानि हर्तुम् आरभते । आत्मानं गृहस्वामिनं मत्वा अन्यान् अतिथीन् शास्ति । सर्वेषां जीवनं दुःसहं करोति । सौम्यः भवान् तं कथं गृहात् बहिष्करोमि इति चिन्तने मग्नः । परन्तु कोऽपि उपायः न स्फुरति । काले अन्ये सर्वे अतिथयः बाधाम् असहमानाः भवतः गृहात् दुःखेन प्रतिष्ठन्ते । अचिरात् अन्यैः विना स्थातुम् अनिच्छन् सः धूर्तः अतिथिः अपि निर्गच्छति । किं भवान् तादृशम् अतिथिं पुनः आमन्त्रयते ? भवान् अपि स्वयमेव प्रकृतिनाम्न्या गृहस्वामिन्या आमन्त्रितः धरण्यां वसन् तादृशः धूर्तः अतिथिः इति जानाति किम् ?

प्रातःकाले उत्थानानन्तरं “समुद्रवसने देवि पर्वतस्तनमण्डले । विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे॥” इति भूमातुः क्षमाम् आयाच्य भूमौ पादौ स्थापयतां सज्जनानां संस्कृतिः अस्माकम् । वयं धरण्याः स्वामिनः न, केवलं तस्याः अतिथयः इति अस्माकं पूर्वजाः जानन्ति स्म । अतः एव अस्माकं संस्कृत्यां जन्तूनां वनानां वृक्षाणां च प्रभूतं गौरवम् आसीत् । तेषु देवत्वमपि आपादितम् । केवलं भारतदेशे एव न परन्तु विश्वस्य अन्येषु बहुषु पुरातनसंस्कृतिषु प्रकृतेः सम्मानः क्रियते स्म ।

परन्तु कालान्तरे यदा वैज्ञानिकाभिवृद्धिः सञ्जाता, मनुष्यः विज्ञानेन प्रकृतिं जेतुं आरब्धवान् । तस्मात् प्रकृतिं प्रति गौरवभावना क्रमशः क्षीणा जाता । अद्य सर्वेषु जन्तुषु चतुरः मनुष्यः चक्रवर्तीव भूमिं पालयति । निःशुल्केन प्राप्तानां भूमेः खनिजादीनां स्वप्रयोजनाय दुरुपयोगं करोति । यथेष्टं वनानि खण्डयति । अवकरैः भूमिवायुजलादीन् प्रदूषयति । अन्येषां जन्तूनां वासावरणानि विना चिन्तनं ध्वंसयति । अद्य तु ईदृशानां क्रियाणां परिणामाः सर्वत्र दृश्यन्ते । भूमेः तापः प्रतिवर्षम् उष्णतरः जायते । केषुचित् देशेषु अतिवृष्टिः अन्येषु प्रदेशेषु अनावृष्टिः च दृश्येते । पर्यावरणप्रदूषणात् सर्वेषां जीविनां स्वास्थ्यं नश्यति । एतैः न केवलम् अन्येषां पशुवृक्षादीनाम् अपि तु मनुष्याणां जीवनमपि दुर्भरमभवत् । शतवर्षानन्तरम् अस्माकं पुत्रपौत्राणां जीवनं कियत् दुःसहं भवतीति चिन्तयितुमपि भीताः भवेम वयम् ।

अस्याः समस्यायाः परिष्कारः कः? प्रथमं धरण्या अस्माकं सम्बन्धस्य विषये चिन्तनं परिवर्तनीयम् । वयं विश्वस्य स्वामिनः न, केवलम् अन्यैः जीविभिः सह वसन्तः अतिथयः इति सदा प्रत्येकेन स्मर्तव्यम् । निःशुल्कं भूमेः यत् सर्वं प्राप्तं तत् अमूल्यमिति ज्ञातव्यम् । वृक्षाः रक्षणीयाः, वनानि वर्धितव्यानि, ऊर्जः कृपणतया व्ययनीयः, अवकरोत्पत्तिः न्यूनीकर्तव्या च । पर्यावरणसंरक्षणाय सर्वकारैरपि शासनानि प्रतिष्ठापनीयानि । तदर्थं प्रजाभिः अस्माभिः आग्रहः कर्तव्यः । अस्माभिः सर्वैः जागरूकतया व्यवहर्तव्यं यतः वयं धरण्याः धूर्ताः अतिथयः न भवेम । प्रातःकाले पादस्पर्शाय क्षमां याचित्वा अनन्तरं स्पर्शादपि सहस्रधा घोराणि दुश्चेष्टितानि न कर्तव्यानि खलु !

मैथिली वुट्कुरु

## अस्मिन् अङ्के


गृहस्वामी उत अतिथिः १
मैथिली वुट्कुरु

संस्कृतस्य आधुनिकीकरणम् २
निर्माल्य चक्रवर्ती

अङ्गुलीमालः २
सुदर्शन नारायणन्

शाब्दज्ञानम् ३
धनञ्जय वैद्य

अतिलघु–रामायणम् ४
रामप्रियः

नारी ४
पराम्बा श्री योगमाया

विदेशे देववाण्याः प्रतिष्ठा ५
शकुन्तला बहादुर्

संस्कृतशिबिरम् ६
उषा महिसेकर्

पदबन्धः ६


प्रतिस्पन्दान् प्रकाशनार्थं लेखनानि वा कृपया पत्ररूपेण प्रेषयन्तु । दोषाः दृश्यन्ते चेदपि सूच्यन्ताम् ।
सम्पर्कः –
vishvavani@speaksanskrit.org
speaksanskrit.org/vishvavani/

# संस्कृतस्य आधुनिकीकरणम्

संस्कृतम् इति दैवी वाक् भारतवर्षस्य प्राचीनतमा भाषा वर्तते । अस्यां भाषायां यदपि लौकिकं साहित्यं लभ्यते, तत्र प्रतिफलितायाः जीवनधारायाः, समाजव्यवस्थायाश्च वयं समयदृष्ट्या सहस्रवर्षदूरमागतवन्तः । इयं भाषा अस्माकं देशस्य तदानीन्तनजीवनेन सह ईदृशरूपेण सम्बद्धा जाता यत् तस्याः पुराणमहाकाव्यादिरससिक्तप्रभावात् मानसिकरूपेण आत्मानं मोचयितुं नरः न शक्नोति । अतः संस्कृतभाषा केवलं भूतकालस्य राजानं मन्त्रिणं राजपुत्रं राजकविं वा वर्णयितुं योग्या, वर्तमानकालस्य विज्ञानाश्रितसमाजस्य सभ्यतायाः वा यथोचितचित्रणे न कदापि समर्था – इयमेव धारणा सर्वत्र व्याप्नोति या वस्तुतः नाहैतुकी इत्यहं मन्ये ।

संस्कृतभाषायां साहित्यसृष्टेः धारा बहुपूर्वम् एव अवरुद्धा । अतः जीवनव्यवस्थायाः क्रमपरिवर्तनात् सुदीर्घकालं यावत् सा भाषा विच्छिन्ना भूता । शनैःशनैः विभिन्नासु अपरभाषासु शब्दानां व्यङ्ग्यार्थाः परिवर्तिताः, नवसङ्केतितार्थानधिकृत्य नवनवशब्दाः भाषाप्राङ्गणम् आच्छादितवन्तः । अपि तु मातृसमसंस्कृतस्य वरपुत्राः तस्याः परिवर्तनोपयोगिसंस्कारसाधने दीर्घसमयं नाग्रहं प्रदर्शितवन्तः । यथा धर्मो रक्षितः रक्षति तथैव भाषा अपि रक्षिता रक्षति इत्यस्मिन् नात्र संशयः । ऐतिहासिकपटे जातानि परिवर्तनादीनि बहूनि कारणानि सन्ति येषां चर्चा बहुलज्ञानेनात्र विवर्जिता । अनेन इयं भाषा क्रमशः जनमानसविच्युता कथ्यभाषारूपेण विस्मृता जाता मृतभाषारूपेण च परिगणिता ।

एवंप्रकारेण सम्प्रति अप्रयुज्यमानां संस्कृतभाषां चेत् पुनः आधुनिकभारतीयसभ्यतासंस्कृतेः शिखायामुपस्थापयितुं स्पृहयामः, तदा अस्याः भाषायाः आधुनिकीकरणमतीव आवश्यकमस्ति इत्येव मे सुदृढः विश्वासः । भामहाचार्यस्य श्लोकं स्मरामि –

काव्यान्यपि यदीमानि व्याख्यागम्यानि शास्त्रवत् ।
उत्सवः सुधियामेव हन्त दुर्मेधसो हताः ॥

संस्कृतज्ञाः जनाः सदैव सुधियां कृते भाषाचर्चां कृतवन्तः, न साधारणानां कृते ।

व्याकरणस्य कठोरनिगडेन स्थाणुवदाबद्धा भाषाप्रयोगशैली साधारणबुद्धिगोचरा सहजप्रयोगसम्भवा भवितुमर्हति । सहस्रवर्षपूर्वनिर्दिष्टनियमाभिः व्युत्पन्नाः बहुचर्चिताः, बहुप्रयुक्ताः, बहुभक्षिताश्च शब्दाः नवनवोत्पन्नशब्दमण्डलेन सुसज्जिताः साधारणपरिचययोग्याः भवेयुः । इत्थं संस्कृताभिलाषिसुहृदः संस्कृतस्य पुनरुत्थानाय तस्याः आधुनिकीकरणस्य कृते यदि भाषायाः व्याकरणगतं सौविध्यं प्रयोगगतं सौकर्यं च वर्धयन्ति, तदा देवभाषायाः आर्यावर्ते पुनः प्रचारः सम्भवति इत्यहं मन्ये ।

**निर्माल्य चक्रवर्ती**

# अङ्गुलीमालः

पूर्वं कोसलदेशे (अद्यतन–उत्तरप्रदेशे) प्रसेनजितः नाम राजा आसीत् । सः भगवतः गौतमबुद्धस्य शिष्यः आसीत् । कदाचित् प्रसेनजितस्य राजपुरोहितः गर्गः चिन्तामग्नः भूत्वा राजानमवदत् – "हे राजन्, मम शिशुः भविष्यति काले चोरः भूत्वा समाजबाह्यः भविष्यतीति कश्चन ज्योतिषः सूचितवानस्ति । अहं किं करवाणि ?" इति । एतत् श्रुत्वा राजा गर्गं समाश्वास्य अवदत्, "चिन्ता मास्तु । भवतः पुत्रस्य विद्याभ्याससमये अहिंसाविषये एव विशेषशिक्षणं दातुं व्यवस्थां करोतु ।" पुरोहितः गर्गः तथैव कर्तुं निश्चित्य पुत्रस्य अहिंसकः इत्येव नामकरणमपि कृतवान् ।

अहिंसकः सर्वाणि शास्त्राणि अधीत्य तक्षशिलां गन्तुम् इच्छुकः आसीत् । कालेन सः गुरोः प्रियतमः शिष्यः अभवत् । एतत् दृष्ट्वा अहिंसकस्य सहपाठिनः ईर्ष्यया तं गुरुकुलात् बहिष्कर्तुं कूटं रचितवन्तः । तैः प्रेरितः गुरुः अपि अहिंसकं गुरुकुलात् बहिष्कृतवान् । दुःखितः अहिंसकः गुरुकुलात् निर्गत्य गृहमागतवान् । गुरुणा तिरस्कृतं पुत्रं दृष्ट्वा जनकः गर्गः क्रुद्धः अभवत् । पुत्रं कुलपांसुलं मत्वा सः अपि तं गृहात् बहिष्कृतवान् । अहिंसकः मनोवेदनया वनवासाय प्रस्थितवान् ।



वने कश्चन तस्करः अहिंसकम् आक्रम्य तस्य धनं चोरयितुं प्रायतत । अहिंसकः स्वरक्षणार्थं चोरं खड्गेन प्राहरत् । तेन चोरः मृतः अभवत् । तदा अहिंसकः अचिन्तयत् – "अहमपि एषः तस्करः इव मार्गलुण्ठनं कृत्वा मम जीवनं यापयितुं शक्नुयाम्" इति । कालेन सः तथैव अनेकेषां पथिकानां वस्तूनि अपहृत्य तेषां वधं च कृत्वा तेषाम् अङ्गुलीभिः मालां रचयित्वा स्वयं धरति स्म । अतः जनाः तम् "अङ्गुलीमालः" इत्येव निर्दिशन्ति स्म । इदं ज्ञात्वा अहिंसकः अपि सगर्वं निश्चितवान्, "मालायां सहस्रम् अङ्गुलीः योजयामि" इति । दिने दिने क्रूरकृत्ये वर्धमानं दुष्टम् अहिंसकं सजीवं गृहीतुं राजा प्रसेनजितः स्वसेनामेव प्रेषितवान् । परन्तु अहिंसकः संपूर्णां सेनामपि संहृतवान् । एतेन सर्वे जनाः भयग्रस्ताः अभवन् । राजा अपि जनान् "अङ्गुलीमालस्य वासस्थलस्य समीपमपि मा गच्छन्तु" इति आदिष्टवान् । शीघ्रं हि अङ्गुलीमालः एकोनसहस्रम् अङ्गुलीः सञ्चितवान् ।

(तृतीयपुटे अनुवर्तते)

# शाब्दज्ञानम्

असिद्धवदत्रा ! भाति सर्वं शब्देन विना । निःशब्दबुद्धिर्नावगच्छति किमपि, इति चेत् ? नासदासीन्न सदासीदीति ज्ञानस्यात्यन्ताभावः । तन्न । अस्ति किमपि । शब्दाभावेऽपि ज्ञापयति संवेदना । नाम्नोऽभावो ज्ञानस्याभाव एवेति भ्रमः । किं नाम नाम ? सङ्केतशब्दः । को नाम शब्दः ? न ज्ञाते शब्दे, शब्दस्य शब्देषु व्याख्या न शक्या । व्याख्याविप्रश्नः कथं नु शक्यः ? विप्रश्नः ज्ञानतृष्णा । सा संवेदना । तस्या निःशब्दभावः शक्यः ।

अव्याख्यात एव शब्दः कृतः । "अ" । इति कृतः । कोऽत्र सङ्केतः ? सङ्केतं विना तन्नाम न । सर्वनाम्नः स्म भवेत् सङ्केतः स एको ध्वनिः । नैष ज्ञानतृष्णां शमयति । एकनामनि सति, किमप्यस्तीत्येव बोधः । अप्रकेतं सलिलं सर्वमा ! इदम् ।

ज्ञानतृष्णा कामः । कामस्तदग्रे समवर्तत । एकोऽयं बहुस्यादिति । तस्मात् । सर्वस्य द्वे कृते । द्वे अभवतां वा । कामः कर्ता वा ज्ञाता वा । "अ अ" इति । तस्माच्च । "अ अ अ अ" इति । पौनःपौन्यात् कालमापनम् । तदग्रे तु पौनःपौन्यात् कालज्ञानम् । "यदिदानीं श्रूयते ध्वनिस्तथैव श्रुतोऽग्र" इति स्मृतिरेव भूतकालज्ञानम् । इदानीं यः श्रूयते स ध्वनिर्लुप्स्यते, पश्चाच्च पुनर्भविष्यति समो ध्वनिरिति अपेक्षा, सैव भविष्यत्कालज्ञानम् ।

वृद्धिरा ! तदैजते स्म शब्दविवक्षास्याः । विभिन्नगुणप्राप्ता ध्वनयः स्युः । एष "य"स्तन्न "सः", अमू "कः" कोऽपि ध्वनिः । शब्दभेदास्तु भिन्नध्वनित्वात् । प्रत्येकेन तथ्यभेदेन सह, पदार्थभेदेन सह, व्यक्तिभेदेन सह एकैको भिन्नः शब्दो युज्यते । तिरश्चीनः शब्दरश्मिर्विततः । द्योतनात् स्फुटं प्रकटयति सर्वं भिन्नभिन्नम् । शब्दस्फोटो व्यक्तिज्ञानस्फोटः । शब्दे अर्थधारणाशक्तिः । अर्थवच्छब्दस्य पदमिति सञ्ज्ञा ।

विश्वस्य पदैः सञ्ज्ञाप्राप्तस्यापि ज्ञानतृष्णा न शान्ता । नामकरणमात्रात् सर्वं स्थाणुरित्येव अवगम्यते । तन्न सत्यम् । कालभेदादस्तित्वभेदः सुस्पष्टः दृश्यते । गतवति काले पदार्थानां संयोगवियोगौ व्यक्तीनां प्रभवनाशौ भवतः, इति संवेदना ज्ञापयति । शब्देन कालो ज्ञातः, शब्देन व्यक्तिभेदो ज्ञातः, इतःपर्यन्तं तु कालकृतस्य व्यक्तिविकारस्य पदार्थविकारस्य वा शाब्दज्ञानं न । कथं सर्वस्य तस्य शाब्दं ज्ञानं धेयम् ?

समर्थः पदविधिः तत्कर्तुम् । पदविधिः पदव्यवस्था । सा पदार्थसम्बन्धान् ज्ञापयति । तेन वक्ष्यति संयोगवियोगौ प्रभवनाशौ भावाभावौ । पदानां व्यवस्था समर्था वक्तुं व्यक्तयोः सम्बन्धः, समर्था वक्तुं कालकृतं व्यक्तिपदार्थविकारम् । तस्मात् किम्?

प्रत्ययः । विश्वस्य संवेदनाज्ञानं शब्दपूर्वमेव, इत्युक्तमेव । परं तु तज्ज्ञानं प्रत्ययो न । पश्यन्ती सा । प्राकृतं च तज्ज्ञानमचलं च ज्ञानं पश्यन्त्याः । भूमिः पर्जन्यमाप्नोति तथैव संवेदना आप्नोति शब्दानभिज्ञां पश्यन्तीम् । परश्च शब्दात् ? मध्यमावैखर्यौ वाचौ शब्देन पदेन तथ्यस्य व्यक्तिशः विघटनं कुरुतः, वाक्येन काव्येन पदार्थानां व्यक्तीनां संघटनं कुरुतः । पश्यन्त्याः दृष्टाभिरसिद्धाभिः संवेदनाभिः सिद्धं ज्ञानं जनयतः । स्वौजसं प्रकटयतः, भूम्यां बीजं पर्जन्यादनन्तरं स्फुटति यथा ।

कस्मै हितम् ? वेत्ति कोऽपि सर्वं कदाचित् ? तस्मै हितम् ? य एतज्ज्ञानं दधे सो अङ्ग वेद यदि वा न वेद ।

---

एतस्मिन् गद्यखण्डे पाणिनीयानि सूत्राणि नासदीयसूक्तवाक्यानि च इतस्ततो न्यस्तानि । तेषां सूचिरत्र दीयते ।

- असिद्धवदत्राभात् । पा० ६.४.२२ ॥
  सर्वनाम्नः स्मै । पा० ७.१.१४ ॥ सर्वस्य द्वे । पा० ८.१.१ ॥
  अ अ (इति) । पा० ८.४.६८ ॥ वृद्धिरादैच् । पा० १.१.१ ॥
  समर्थः पदविधिः । पा० २.१.१ ॥ प्रत्ययः । पा० ३.१.१ ॥
  परश्च । पा० ३.१.२ ॥ स्वौजसम्० । पा० ४.१.२ ॥
  तस्मै हितम् । पा० ५.१. ५ ॥
- अर्थः पदम् । इति ऐन्द्रव्याकरणसूत्रम् ।
- नासदासीन्न सदासीत् । अप्रकेतं सलिलं सर्वमा इदम्।
  कामस्तदग्रे समवर्तत । तिरश्चीनो रश्मिर्विततः । दधे ।
  सो अङ्ग वेद यदि वा न वेद ।

धनञ्जय वैद्य

(द्वितीयपुटात् अनुवर्तते अङ्गुलीमालः)

एकदा भगवान् बुद्धः अङ्गुलीमालस्य क्षेत्रस्य समीपे मार्गे गच्छन् आसीत् । तं दृष्ट्वा अङ्गुलीमालः अचिन्तयत् – "एतं हत्वा एतस्य अङ्गुलीं छित्वा मालायां सङ्कलयामि चेत् मम माला अङ्गुलीसहस्रेण संपूर्णा भवेत् । अतः निश्चयेन अहम् एतं हन्मि" इति । ततः सः बुद्धम् अनुगतवान् । परन्तु एतत् ज्ञात्वा अपि बुद्धः निर्भीतः निश्चलेन मनसा यथापूर्वं मार्गे गच्छन्नेव आसीत् । अङ्गुलीमालः सर्वथा बुद्धम् आक्रान्तुं प्रायतत , किन्तु असफलः अभवत् । श्रान्तः सः बुद्धम् अवदत् – "तिष्ठतु रे, अलं चलनेन । अहं तव संहारं कृत्वा तव अङ्गुल्या मम मालां पूरयित्वा सहस्राङ्गुलीमालां धरामि" इति । एतत् श्रुत्वा गौतमबुद्धः अवदत् – "अहं नैव सञ्चरामि बालक । अत्रैव स्थितः अस्मि । भवतः मनः एव पथिकः इव लक्ष्यहीनं सञ्चरति । यदि मम हननेन तव मनः शान्तिं प्राप्स्यति, तर्हि मारयतु तावत् माम् । अहं भवतः कार्यविघ्नं नैव करोमि" इति । भगवतः बुद्धस्य एतत् वचनं श्रुत्वा व्याकुलचित्तः अहिंसकः ज्ञानोदयं प्राप्तवान् । सः अचिन्तयत् – "मनुष्यः हिंसामार्गम् अनुसरति चेत् सर्वदा मनोवेदनाम्, अशान्तिं चैव प्राप्नोति" इति । अस्याः घटनायाः पश्चात् अहिंसकः गौतमबुद्धस्य पादौ शरणं गतः ।

सुदर्शन नारायणन्

# अतिलघु-रामायणम्

रघु–वर तव पद–कमलम्–अति–मृदुल– ।
मिति मधुर–कवि–वचनम्–इति स वदति ॥ १ ॥

दशरथ–सु–तनय कुशिक–तनय–मख–
विदलक–विदलन जनक–पुर–गमन ॥ २ ॥

विभजित–शिव–धनुर्–अधिकृत–परिणय ।
जनक–दुहितृ–युत–निज–पितृ–पुर–गत ॥ ३ ॥

जनक–वचन–धृत वन–चरित–चरण ।
पद–कमल–पतित–भरत–तद्–अवन–द ॥ ४ ॥

हरिण–तनु–दितिज–यम–सदन–गमित ।
अपहृत–जनक–दुहितृ–विषय–विदित ॥ ५ ॥

पवन–तनय–नुत रवि–सुत–सहृदय ।
शर–विभजित–तद्–अहित–कर–कपिवर ॥ ६ ॥

पवन–सुत–विदित–सुख–विषय–मुदित ।
कपि–जन–विरचित–पथ जलधि–तरण ॥ ७ ॥

असुर–गण–हनन दश–वदन–दमन
नत–तदनुज–दितिज–पति–पद–नयन ॥ ८ ॥

धन–पति–गगन–गमन–गत–निज–पुर ।
तुषित–भरत–गुरु–जन–पुर–जन–गण ॥ ९ ॥

अधिगत–नृप–पद जनपद–नत–पद ।
नत–गुरु–जन–पद सरसिज–सम–पद ॥ १० ॥

अघ–हरण–निपुण सरसिज–सुनयन ।
पितृ–वचन–धरण सकल–रिपु–दमन ॥ ११ ॥

अपरिमित–सुगुण रघु–कुल–सुतिलक ।
तव चरण–कमलम्–इह शरणमिति च ॥ १२ ॥

रघु–वर तव पद–कमलम्–अति मृदुल– ।
मिति मधुर–कवि–वचनम्–इति स वदति ॥ १३ ॥

गुरु–रहित–रघु–वर–सुत–नमनम्–इह
यदि लघु–लिखितमपि रघुपतिर्–अवतु ॥ १४ ॥

रामप्रियः

# नारी

यस्मिन् सा विश्वसिति
स ताम् उपहसति, शतधा विदारयति ।
सुरक्षायाः कैतवेन खेदयति ।
प्रवञ्चनायाः विषावर्ते क्षिपति ।
शठत्वमाचरति ।
लोलुपदृष्ट्या लुण्ठनादनन्तरं
विश्वासं हलाहलयति ।
येन सा हतवाक् हतप्रभा ।
मृत्युः श्रेयस्करः प्रतिभाति ॥

सभ्यमानवस्य प्रच्छन्नतायां
सततमुन्मादितमादिमत्वं पशुत्वम् ।
नैष श्रेष्ठः आदिमानवात् ।
समधिका सभ्या कैषा प्रवृत्तिः ?
ततोऽधिका भयङ्करी साम्प्रतिकी कुरीतिः ।
सभासमित्योः प्राबल्यं नारीजागर्तये ।
सभास्थलान्तराले चीत्करोति नारी सुरक्षायै ।
कः दास्यति सुरक्षां नग्नसमाजे ?
भग्नमानसिकता नैतिकताभावे ।
शब्द एकः 'नारी' पणीभूतोऽद्य ।
मारिता वा लाञ्छिता वापहृता सद्यः ।
न ज्ञायते एषा समाजस्य पुरुषस्योत सृष्टेः विकृतिः ॥

अशिष्टाचरणे प्रच्छन्नोऽभिशापः ।
कुलाचारहीनः कदाचारलीनः ।
मनुवंशोद्भवः किमेष वा मानवः ?
सृष्टेः अद्वितीयः अभिनवः जीवः !!
ऊर्ध्वरेता योऽत्र पुरुषविशेषः ।
व्यतिक्रमः सम्भ्रान्तः एकदा ज्ञातः ।
अनिर्णितविश्वासेन सदा निर्लिप्तः ।
अनागतशङ्कायां व्योमवत् प्रशस्तः !!
तथापि जीवनधारा नार्यः विश्रामरहिता ।
समाजसन्तोलं यथा पूर्वं परमपि तथा ।
तस्याः कृते नाभवत् विघटिता कापि नूतनता ।
सैव स्थितिः असहनीयतायामपि सोढव्या ।
नो चेत् कथं तिष्ठेत् तस्याः जिजीविषा ।
कुत्रचित् परिवारे ज्येष्ठा कन्या सा ।
कुलस्य कुत्र वा सर्वविधाऽऽशा ।
सामान्यदृष्ट्या सा नाद्य गृहवन्दिनी ।
जीवनसंग्रामे सा कुन्ती उत याज्ञसेनी ।
शतयन्त्रणामध्येऽपि कुन्ती राजमाता ।
शतयातनामध्येऽपि कृष्णा पतिव्रता ।
शतनिर्यातनायां सा सृष्टिरपरा ।
देवकृपाप्राप्ता उत अभिशप्ता ?
जननी, भगिनी उत जाया प्रेमसिक्ता !!

परාम्बा श्री योगमाया

# विदेशे देववाण्याः प्रतिष्ठा

(संस्मरणम् – पञ्चचत्वारिंशद्वर्षेभ्यः पूर्वं कृतायाः विदेशयात्रायाः)

संस्कृतसाहित्ये अस्माकं देशस्य संस्कृतिः प्रतिष्ठिता । विश्वसंस्कृतेः प्राचीनतमं वैदिकसाहित्यमपि अस्यामेव भाषायामुपनिबद्धम् । पाश्चात्यदेशीयाः विद्वांसः अस्याः एतादृशीं परिपूर्णामवस्थितिमवलोक्य भारतीयसाहित्यसंस्कृतयोः अध्ययनाय प्रवृत्ताः अभवन् । संस्कृतमधीत्य अस्य गुणगणमहिमानं वर्णयन्तः समग्रविश्वस्य समक्षे संस्कृतसाहित्यस्य तैः पुनःप्रतिष्ठा कृता ।

अनेनैव कारणेन विश्वस्य बहुषु देशेषु भारतीयविद्या (Indology) विश्वविद्यालयस्य पाठ्यक्रमे अपि स्वीकृता । पाश्चात्यमनीषिणः तत्र साहित्यस्य संस्कृतेश्च अध्यापनेन शोधकार्येण च देववाण्याः प्रचारम्प्रसारञ्च कुर्वन्ति ।

अध्ययनकाले गुरुमुखेन अहं श्रुतवती यत् शर्मण्यदेशे (जर्मनीनामधेयं) संस्कृतज्ञैः अतिशयेन शोधकार्यं कृतम् । तत्र संग्रहालयेषु प्राचीनसंस्कृतग्रन्थानां पाण्डुलिपयः सुरक्षिताः । विद्वद्भिः विविधभाषाणां तुलनात्मकाध्ययनेन संस्कृतभाषायाः अध्ययनाय, विशेषेण तु अस्माकं वैदिकसाहित्यानुशीलनाय आलोचनात्मिका वैज्ञानिकी प्रणाली च प्रादुर्भूता । कतिपयाः विद्वांसस्तु तत्रास्मिन् क्षेत्रे पूर्णरूपेण समर्पिताः । इत्थं तत्र गत्वा अध्ययनाय मम मनसि विशेषाभिरुचिः संजाता । सौभाग्यादस्मिन्विषये जर्मनगणतन्त्र–राज्यस्य छात्रवृत्तिं प्राप्य, मया यदा (तत्कालीनं) पश्चिमीजर्मनीनामधेयं देशं प्रति प्रस्थितं, तत्क्षणन्तु मम जीवने अतीवहर्षोत्पादकं महत्त्वपूर्णञ्चाभवत् । १९६२ वर्षस्य नवम्बरमासे मया मुम्बईनगरात् जलपोतेन प्रस्थानं कृतम् । फ्रांसदेशस्य मार्सेल्सनगरपर्यन्तं त्रयोदशदिवसानि मया जलयाने व्यतीतानि । जलयाने भोजनादीनां व्यवस्था समुचितैवासीत् । मनोरञ्जनार्थं चित्रपटं, विविधक्रीडास्पर्धाश्च समये समये आयोजिताः आसन् ।



**व्यूबिङ्गन् विश्वविद्यालयभवनम्**

समुद्रयात्रायाः प्रथमावसरोऽयं परमाह्लादकारी प्रतीयते स्म । अगाधजलराशिमध्ये जलयानस्य बाह्यभागे स्थिता अहम् अपूर्वानन्दं प्राप्तवती । अन्तिके तु तत्र महासागरस्य दुग्धधवलफेनिलजलराशिः, सुदूरे च नीलसागरस्य नीलाम्बरस्य च संयोगश्च दर्शनीयौ आस्ताम् । निशान्धकारे विद्युल्लताभिः सुदीप्तानि जलपोतानि दृष्ट्वा इदमेव प्रतिभाति स्म यदगणिततारकमण्डितं गगनमण्डलं वसुधायामेवापतितम् ।

तदा मार्सेल्स्–नगराद् वयं छात्राः बस्–यानेन इटलीदेशे, आस्ट्रियादेशे च मनोहराणि दृश्याणि पश्यन्तः जर्मनीदेशस्य म्यूनिक्–नगरम् आगतवन्तः । शीतकाले हिमपातेन परितः हिमाच्छादितधवलाः पर्वतश्रेण्यः, हिमावृता धरा च अद्भुतसौन्दर्यसमन्विताः रमणीयाः अवलोकनीयाश्च आसन् ।

भारतस्य लक्ष्मणपुरविश्वविद्यालये मया जर्मन्भाषा पूर्वमेव अधीता आसीत् । म्यूनिक्नगरस्य निकटस्थप्रदेशे Goethe Institute नाम्नि संस्थाने पुनरपि जर्मन्भाषामधीत्य एव व्यूबिङ्गन्–नगरस्य विश्वविद्यालयं गतवती । अत्रत्य "प्राच्यविद्या–संस्थानम्" अतिप्राचीनं विख्यातञ्चासीत् । तदानीं भारतीयसंस्कृतेः उपासकः देववाण्याः विचक्षणपण्डितः संस्थानस्य पूर्वनिदेशकः आचार्यः हेल्मूट फ़ॉन ग्लासेनप्प महोदयः अत्रैव साहित्यसाधनायां संलग्नः आसीत् । तस्मिन् काले "विद्यामार्तण्डः" इत्यनेन उपाधिनालङ्कृतः प्रोफ़ेसर् पॉलथीमे महाभागः संस्थानस्य निदेशकपदम् अलङ्करोति स्म । मया थीमेमहोदयात् ऋग्वेदस्य अनेकानि सूक्तानि अधीतानि । मम कक्षायां विविधदेशानां पञ्चदशच्छात्रच्छात्राश्च आसन् । मया तस्यैव निर्देशने त्रीणि शोधपत्राण्यपि लिखितानि प्रकाशितानि च । थीमेमहोदयस्य आदेशात् संस्कृत–हिन्दीभाषे अध्ययनोत्सुकाः विदेशिच्छात्राः अपि तत्र मया पाठिताः । प्रारम्भिकपाठ्यक्रमे तु पञ्चतन्त्रं, नलोपाख्यानं व्याकरणञ्च पाठ्यन्ते स्म । उपरान्तम् उच्चतरपाठ्यक्रमे तु ऋग्वेदस्य विशिष्टसूक्तानि, महाभाष्यस्य उपनिषदः गीतायाश्च अध्यापनं भवति स्म । तत्र महाकविकालिदासस्य काव्यग्रन्थाः नाटकानि च विशेषेण लोकप्रियाः आसन् ।

थीमेमहोदयः वर्षाणि पर्यन्तं वाराणसीनगरे पण्डितेभ्यः विविधशास्त्राणि पठितवान् । अनन्तरं स्वाध्यायेन अतिशयज्ञानार्जनमकरोत् । सः वैयाकरणपाणिनेस्तु प्रशंसकः परमुपासकश्चासीत् । वेदमन्त्राः सूत्राणि च तस्य रसनाग्रे तिष्ठन्ति स्म । यदा मया अपि मन्त्राः उच्चारिताः, तदा सः अतिशयेन अप्रीणयत् । संस्कृतभाषायां तस्य वक्तृत्वं प्रभावपूर्णम्प्रशंसनीयञ्च भवति स्म थीमेमहोदयः वेदानां सन्दर्भे अनेकान् शोधपूर्णलेखान् ग्रन्थांश्च लिखितवान् । तस्मिन्नेव वर्षे भारते आयोजिते विश्वसंस्कृतसम्मेलने वैदिकसमितेरध्यक्षपदेनापि समादृतः अभूत् ।

शर्मण्यदेशस्य विविधनगरेषु विश्वविद्यालयेषु संस्कृतपठनपाठनञ्च भवति स्म । तदा प्रो. अल्सडोर्फ़ः, डा. वल्डश्मिथः, डा. यानर्टः, प्रो. म्यूहलरः, डा. स्ट्रीटकार्न् इत्यादयः महाभागाः विश्रुताः आसन् । हाइडलबर्ग–विश्वविद्यालयस्य "भारतीयविद्यासंस्थानं" दृष्ट्वा मनसि हर्षः सञ्जातः । अत्र प्रवेशद्वारे अथर्ववेदस्य मन्त्रः लिखितः आसीत् । प्रायेण सुगन्धित–धूपवर्तिकायाः वातावरणे भारतीयैः स्वदेशसुखमिवानुभूयते स्म ।

(अग्रिमपुटे अनुवर्तते)

# संस्कृतशिबिरम्

संस्कृतशिबिरं गच्छामः
नूतनस्थानं पश्यामः ।
रमणीयमेतद् दृश्यम्
सर्वेषामुत्सुकता सत्यम् ।

संस्कृतग्राम एवायम्
चतुर्दिनानां सुखशिबिरम् ।
संभाषण आत्मविश्वासः
दृढं भवन्ति वाचालाः ।

अत्र संस्कृतं तत्र संस्कृतम्
सर्वत्र संस्कृतं संस्कृतम् ।
स्वादतु संस्कृतमहर्निशम्
भवेदात्मा परिपूर्णः ।

सर्वे ह्यत्रानन्दिताः
हृदयेष्वतिमोदिताः ।
अभिनव–मित्रबान्धवाः
व्यतीतः शीघ्रं समयः ।

भूयः सम्पर्कं करिष्यामः
शिबिरं पुनरागमिष्यामः ।

उषा महिसेकर

# पदबन्धः - ९

## वामतः दक्षिणम्

१) कया प्रह्लादः जनितः ? (३)
३) जरायुक्तः कठोरः वृद्धः । (३)
४) विसर्गलोपेन दृष्टिहीनम् अस्य मनः । (३)
६) जालमेव स्त्रियाम् । (३)
८) अयं पण्डितः न । (३)
९) हस्तिपः सर्पः इव भाति । (३)

## उपरिष्टात् अधः

१) कूर्मोऽयं मठे वसति । (३)
२) साधुत्वरहितः विपर्यस्तः चरति । (३)
३) जले जाता । (३)
५) धीमान् मात्सिकोऽयम् । (३)
७) मनसः इच्छा । (३)
८) पादेन पिबति तरुः । (३)




## पदबन्धः - ८ उत्तरम्




पदबन्धस्य साधु उत्तरं सेप्टेम्बर्–मासान्त्यात् पूर्वं यैः प्रेष्यते तेषां नामानि अग्रिमाङ्के प्रकाशिष्यन्ते । उत्तरं vishvavani@speaksanskrit.org प्रति प्रेष्यताम् ।

(पञ्चमपुटात् अनुवर्तते विदेशे देववाण्याः प्रतिष्ठा)

अत्र संस्कृतस्य महत्त्वपूर्णग्रन्थानां संग्रहः प्रशंसनीयः आसीत् । अस्मिन् सन्दर्भे बर्लिनविश्वविद्यालयस्य संस्थानमविस्मरणीयम् । अस्य पुस्तकालये दुर्लभप्राच्यग्रन्थानां संग्रहः मया दृष्टः । संस्कृतपालिग्रन्थानां पाण्डुलिपयः अत्र सुरक्षिताः आसन् । संस्कृताध्ययनरताः छात्राः अत्र मम श्लोकगानं संस्कृतसंभाषणञ्च श्रुत्वा हर्षिताः अभवन् ।

तस्मिन्नेव वर्षे पेरिस्–विश्वविद्यालये तत्रत्य–संस्कृतविभागाध्यक्षपदमलङ्कुर्वतः डा. रेनोमहोदयस्य महता प्रयासेन एकस्याः संस्कृतसंगोष्ठ्याः आयोजनं बहुभिः प्रशंसितमभूत् । तदानीं योरोपमहाद्वीपस्य विविधदेशानां विद्वद्भिः गवेषणात्मकाः निबन्धाः प्रस्तुताः । स्वकार्यार्थमहम् इङ्ग्लैण्डदेशमपि गतवती । लण्डन्–नगरे India Office Library नाम्नि बृहत्पुस्तकालये अनेके सुदुर्लभाः ऐतिहासिक–सांस्कृतिक–साहित्यिकग्रन्थाः, अनेकाः पाण्डुलिपयश्च अतिप्रयासेन सुरक्षिताः । अप्राप्तग्रन्थानां प्रतिकृतिः (Photocopy) न केवलं तत्रैव दीयते, मूल्यप्रदाने तु पत्राचारमाध्यमेन अन्यदेशमपि प्रेष्यते स्म । आक्सफ़ोर्ड्–विश्वविद्यालये मोक्षमूलरस्यस्मृत्यां स्थापिता "संस्कृत–पीठिका" उल्लेखनीया । यात्रायाः अन्तिमचरणे मया स्विट्ज़रलैण्ड–इटली–स्पेन्–प्रभृतीनां देशानामपि त्वरितभ्रमणं कृतम् । प्रमुखरूपेण तु मया द्विवर्षावधेः सर्वाधिकसमयः तत्कालीनपश्चिमीजर्मनीदेशे व्यतीतः ।

जर्मनीदेशवासिनः अतीवाध्यवसायिनः । द्वितीयविश्वयुद्धे पूर्णरूपेण ध्वस्ते अस्मिन् देशे तदा क्वचिदपि भग्नावशेषाः न दृश्यन्ते स्म । गगनस्पर्शिभवनानां मध्ये तेषां वैज्ञानिकप्रगतिं दृष्ट्वा जनः आश्चर्यचकितः भवति स्म । कालस्य अत्यल्पावधौ (१९६२ वर्षे) राष्ट्रियभावनाप्रेरितैः स्वदेशस्य प्रगतिमार्गे संलग्नैः जर्मनीनिवासिभिः अप्रत्याशितरूपेण स्वदेशः अतिशयसुखसमृद्धिसंपन्नः कृतः यत्, विशेषरूपेण उल्लेखनीयमनुकरणीयञ्चासीत् ।

इत्थम् इयं विदेशयात्रा मम जीवने अविस्मरणीया एव स्थास्यति ॥

शकुन्तला बहादुर